# shrIshivanavaratnamAlAstavaH

# श्रीशिवनवरत्नमालास्तवः

## Document Information

Text title : shrIshivanavaratnamAlAstavaH

File name : shivanavaratnamAlAstavaH.itx

Category : shiva, nava, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : November 7, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# श्रीशिवनवरत्नमालास्तवः

श्रीगणेशाय नमः ॥

कलय कलावित्प्रवरं कलया नीहारदीधितेः शीर्षम् ।
सततमलङ्कुर्वाणं प्रयतावनदीक्ष यक्षराजसख ॥ १॥

कान्तागेन्द्रसुतायाः शान्ताहङ्कारचिन्त्यचिद्रूप ।
कान्तारखेलनरुचे शान्तान्तःकरणभेनमव शम्भो ॥ २॥

दाक्षायणीमनोऽम्बुजभानो वीक्षावितीर्णविनतेष्ट ।
द्राक्षामधुरिममदभरशिक्षाकर्त्रीं प्रदेहि मम वाचम् ॥ ३॥

पारदसमानवर्णो नीरदनीकाशदिव्यगलदेशः ।
पादनतदेवसङ्घः पशुनिशं पातु मामीशः ॥ ४॥

प्रत्यक्षो भव शम्भो गुरुरूपेणाशु मेऽद्य करुणाब्धे
चिरतरमिह वासं कुरु जगतीं रक्षन्प्रबोधदानेन ॥ ५॥

यक्षाधिपसत्तमनिशं रक्षाचतुरं समस्तलोकानाम् ।
वीक्षादापितकवितं दाक्षायण्याः पतिं नौमि ॥ ६॥

यमनियमनिरतलभ्यं शमदममुखषट्कदानकृतदीक्षम् ।
रमणीयपदसरोजं शमनाहितमाश्रये सततम् ॥ ७॥

यमिहृन्मानसहंसं शमिताघौघं प्रणाममात्रेण ।
अमितायुःप्रदपूजं कमितारं नौमि शैलतनयायाः ॥ ८॥

येन कृतमिन्दुमौले मानववर्येण तावकस्मरणम् ।
तेन जितं जगदखिलं को न ब्रूते सुरार्यतुल्येन ॥ ९॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितः श्रीशिवनवरत्नमालास्तवः सम्पूर्णः ।

Proofread by PSA Easwaran

*shrIshivanavaratnamAlAstavaH*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*